क्षणमपि चरमामण्ववस्थां न जह्यात् TattvMu. 1.22; नित्याणौ जीवतत्त्वे न कथमपि भवेदण्ववस्थाप्रसूतिः TattvMu. 5.50.

**अण्वश्मवृक्षा** ( aṇvaśmavṛkṣā ) *adj.* ( *f.* ) abounding in small stones and trees अण्वश्मवृक्षा ह्रस्वलङ्घनीयश्वभ्रा मन्ददरणदोषा चाश्वभूमिः ArthŚā. iii. 122.2 (10.4)

**अण्वाकार** ( aṇv-ākāra ) *m.* atomic form गृह्णेरन् सर्वभावानामण्वाकाराश्च तद्गताः ŚlokaVār. 5(3).44 (281.4)

**अण्वाकाशसंयोग** ( aṇvākāśa-saṁyoga ) *m.* contact of atom with ether अण्वाकाशसंयोगं तु कृतकमितीच्छन्ति NyāyVār. 299.2 (*on* ii. 2.18)

**अण्वाख्यपरिमाण** ( aṇvākhya-parimāṇa ) *n.* dimension called *aṇu* अणुपरिमाणम्-अण्वाख्यपरिमाणयुक्तम् Bhāsk. i. 225.10 (*on* i. 5.6)

**अण्वात्मवाद** ( aṇvātma-vāda ) *m.* theory about the atomic nature of soul अण्वात्मवादेऽपि भोगश्चेशे प्रसज्यते VedāntSiSūMañ. 2.67.

**अण्वादि** ( aṇv-ādi ) *adj.* **1** atom and others स्थित्वा प्रवृत्तिरण्वादेर्न सिद्धा क्षणभङ्गतः TattvSaṁ. 83; SarvaDaSaṁ. 3.252; **2** small, etc. कर्णसंधिः … ( पाल्याम् ) बाह्यः समः समयोश्च । अण्वादिविषमयोस्तु परस्परविपर्ययेण AṣṭāSaṁ. ii. 261.5 ( 6.22 ); **3** minute etc. अस्थूलमनण्वित्यादिना स्थूलाण्वादीनामन्यवस्तुस्वभावानां व्यावृत्तेः BrahmSūBh.(Ma.) 16A.2 (*on* i. 3.12); **4** (series of words) commencing with *aṇu*, (class of words) headed by *aṇu* कोऽण्वादेः ŚakaṭāVyā. iii. 3.180 = SiddhaHe. vii. 2.76.

**अण्वादिकारणवाद** ( aṇvādikāraṇa-vāda ) *m.* theory of atoms etc. as the cause ( of the world ) यत्नोऽतीव कृतो नाण्वादिकारणवादप्रतिषेधे BrahmSūBh.(Śaṅ.) 274.14 (*on* i. 4.28); 274.18 (*on* i. 4.28); येऽण्वादिकारणवादास्तेऽपि व्याख्याता द्रष्टव्याः NyāySu.(Ja.) 292A.3 (*on* ii. 1.4)

**अण्वादिगण** ( aṇvādi-gaṇa ) *m.* aggregate of atoms etc. तदलमिहाण्वादिगणो नः NayaMañ. II. ii. 4.7.

**अण्वादिशरीरस्थ** ( aṇvādiśarīra-stha ) *adj.* being in the body of atomic size etc. जीवस्य … अण्वादिशरीरस्थस्य … अकात्स्न्यं स्यात् BrahmSūBh. (Ma.) 30B.10 (*on* ii. 2.34)

**अण्वादिसंघात** ( aṇvādi-saṅghāta ) *m.* conjunction of atoms and others अण्वादिसंघातात् द्व्यणुकादिरुत्पद्यते SarvaDaSaṁ. 3.252.

**अण्वाद्यवयव** ( aṇvādy-avayava ) *adj.* having atoms and others as the parts अण्वाद्यवयवं मूर्तं पीनं संस्थानवद्दृढम् BṛĀraUBhVā. ii. 3.23.

**अण्वारभ्यत्व** ( aṇvārabhya-tva ) *n.* the state of being produced by atoms द्व्यणुकवदण्वारभ्यत्वाविशेषात् NyāyKuA. ii(2). 64.3.

**अण्विका** ( aṇvikā ) *f.* a kind of weight equal to two *kṛṣṇalas* कृष्णलद्वितयं प्रोक्तं अण्विका VyavaNi. 219.1.

**अण्विधान** ( aṇ-vidhāna ) *n.* prescription of the *taddhita* suffix *aṇ* साल्वानां कच्छादिषु पाठोऽण्विधानार्थः Vār. *on* P. iv. 2.133; MahāBh. ii. 300.12 (*on* iv. 2.133); कच्छादिभ्योऽण्विधानात् LaŚabdeŚe. ii. 256.11.

**अण्विधि** ( aṇ-vidhi ) *m.* prescription of the *taddhita* suffix *aṇ* अण्विध्यर्थत्वमस्य वाच्यम् LaŚabdeŚe. ii. 202.7.

**अण्विशिष्ट** ( aṇ-viśiṣṭa ) *adj.* characterised by the *taddhita* suffix *aṇ* न तु कदाचिदप्यौपगव इत्यण्विशिष्टमिष्टं सिध्यति LaŚabdeŚe. ii. 202.2.

**अण्विषय** ( aṇ-viṣaya ) *m.* reference to *aṇ*, subject of the *taddhita* suffix *aṇ* अण्विषय एव पररूपम् LaŚabdeŚe. i. 106.3.

**अण्वी** ( áṇv-ī ) *f.* **1** [Debru. p. 742] finger इन्द्रा याहि चित्रभानो सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ṚV. i. 3.4; VājaS. 20.87; तमीमण्वीः समर्य आ गृभ्णन्ति योषणो दश ṚV. ix. 1.7; अग्रुवः । अण्व्यः । क्षिपः Nigh. 2.5; तत्रापि स्त्र्यर्थे वाण्वीत्यथाङ्गुलौ NānārthāSaṁ. i. 47.56; cf. **अणु**; **2** cord or rein रश्मौ चाण्वी स्त्री NānārthāSaṁ. i. 47.56.

**अण्व्य** ( aṇv-ya ) *adj.* of the atomic size शरीरप्रादेशाङ्गुष्ठमात्रमणोरप्यणुं ( v. l. अण्व्यं ) ध्यात्वा MaitriU. 460.13 (6) ( comm. सूक्ष्मादपि सूक्ष्मतरम् )

**अण्समावेश** ( aṇ-samāveśa ) *m.* simultaneous application of the *taddhita* suffix *aṇ* पृथ्वादिभ्यो वावचनमण्समावेशार्थम् Vār. 1 (*on* P. v. 1.122); MahāBh. ii. 37.19 (*on* v. 1.122); Pradī. iv. 308B.4 (*on* v. 1.122)

**अण्संबद्ध** ( aṇ-sambaddha ) *adj.* connected with the suffix *aṇ* अण्संबद्धसङ्घादीनामनुवृत्तेः LaŚabdeŚe. ii. 278.15.

**अण्सिद्धि** ( aṇ-siddhi ) *f.* establishment of the suffix *aṇ* तत्रेञ्बाधनार्थं शिवादिभ्यो यथा विहितमित्येवाण्सिद्धेः LaŚabdeŚe. ii. 213.11; ii. 275.8.

**अण्स्मरण** ( aṇ-smaraṇa ) *n.* authoritative dictum prescribing the suffix *aṇ* तद्विषयकः प्रेमा सांपरायः कथ्यते । तत्र भव इत्यण्स्मरणात् GoviBh. 236.13 (*on* iii. 3.28)

**अत्** ( at- ) 1. P. (Ā.) [ अत (átá) सातत्यगमने DhātuPā. 1.38; अतति… गतिकर्माणः Nigh. 2.14; DhātuPra. 1.37 (11.19); सातत्यगमनेऽतति DaivaVyā. 94; अत गतौ KāvyKaVṛ. 92.27; KośaKaTa. 2.1339. forms अतसि, अतति, अतत्, अतमान, अतित, with preverbs अभि, अव and सम् ] **1** to go constantly, to walk, to run, to wander समतसि कपोत इव गर्भधिम् ṚV. i. 30.4; आत्मा अततेर्वा । आप्तेर्वा Nir. 3.15 (67.20); भवेष्वतति सातत्यादेति MahāP. 24.107; क्रमं धनसंबन्धक्रमम् अतति गच्छति इति क्रमात् BālamBha. ii. 222.20 (*on* 2.135); **2** to pervade, to reach, to obtain, to shine [used for etymology] अतिथिरभ्यतितो गृहान् भवति Nir. 4.5 ( 76.17 ); अतति व्याप्नोतीत्यत् AṇuBh. 11.14 (*on* i. 1.2); प्राचुर्यमतति प्राप्नोतीति प्राचुर्यात् AṇuBh. 34.12 (*on* i. 1.12); नाप्यात्मशब्दात् प्राणभृद्ग्रहणाज्ञा अत्र संभवति । अततीति व्युत्पत्तेः सर्वव्यापके ब्रह्मण्येव मुख्यत्वात् GoviBh. 41.11 (*on* i. 3.4); अतति प्रकाशते इति GoviBh. 315.9 (*on* iv. 4.3)

**अत्** ( at ) *adj.* **i** spreading, growing, becoming manifest नृपः । सदयोध्यामतो रागाद्ययौ द्वारवतीं पुरीम् RāghPāṇ.(Dha.) 18.130 ( comm. अतः अततीति अत् क्विपि कृते सति रूपं सिद्धं तस्मात् विजृम्भमाणाद् रागात् ); **ii** who goes अतति गच्छतीति अत् Prasā. i. 82.16.

[1]**अत्** ( at ) (Gr.) **i** the short vowel *a* (according to P. i. 1.70) अदेङ्गुणः P. i. 1.2; अदेङ्गुणः SaraKaṇṭhā.(Gr.) i. 1.81; अतो गुणे P. vi. 1.97; एङः पदान्तादति P. vi. 1.109; एङोऽति पदान्तात् JaineVyā. iv. 3.96; द्व्यचोऽतस्तिङः P. vi. 3.135; अतोर्लान्तस्य P. vii. 2.2; अत उपधायाः P. vii. 2.116; अतो दीर्घो यञि P. vii. 3.101; अत आदेः P. vii. 4.70; एप्यतोऽपदे JaineVyā. iv. 3.84; अत आत इत् CāndraVyā. i. 4.2; इटोऽत् CāndraVyā. i. 4.38; एङोऽति पदादौ CāndraVyā. v. 1.115; भुवोऽत् CāndraVyā. vi. 2.126; पदान्तेऽत्येङः ŚākaṭāVyā. i. 1.94; लुगतः ŚākaṭāVyā. i. 3.78; भ्रुवोऽच्च कुटिकुंसे ŚākaṭāVyā. ii. 2.81; वात्यसन्धिः SiddhaHe. i. 2.31; अतोऽति रोरुः SiddhaHe. i. 3.20; अत आः स्यादौ जस्-भ्याम्-ये SiddhaHe. i. 4.1; एङोऽतः MugdhaBo. 2.17 (5.16); वातोऽवाप्योः MugdhaBo. 3.171 (40.3); **ii** (Abl.) (word) ending in *a* अजाद्यतष्टाप् P. iv. 1.4; JaineVyā. iii. 1.4; अत इनिठनौ P. v. 2.115; अतो हेः P. vi. 4.105; अतोऽङ्गस्यैकारः स्यात् PrakriKau. i. 132.2; अजाद्यत् JaineVyā. i. 3.99 ( comm. अदन्तम् ); अतो भिस् ऐस् P. vii. 1.9; CāndraVyā. ii. 1.2; अतोऽम् CāndraVyā. ii. 1.24; अजाद्यतः CāndraVyā. ii. 3.15; अतोऽम् ŚākaṭāVyā. i. 2.4; अजाद्यताम् ŚākaṭāVyā. i. 3.13; हलतः सप्तम्याः ŚākaṭāVyā. ii. 2.9; अदेतः स्यमोर्लुक् SiddhaHe. i. 4.44; अतोऽह्नस्य SiddhaHe. ii. 3.73; अमव्ययीभावस्यातोऽपञ्चम्याः SiddhaHe. iii. 2.2; क्लीबात् स्यमोऽधेर् मोऽतः MugdhaBo. 3.83 (23.8); स्त्रियामत आप् MugdhaBo. 4.1 (40.8); **iii** (Loc.) beginning with the short vowel *a* तिरसस्तिर्यति SiddhaHe. iii. 2.124 ( comm. अकारादौ )

[2]**अत्** ( at ) (Gr.) **i** the syllable substituted for the technical *jh* in the personal terminations of the third person pl. both primary and secondary, active and medial (where the sound *a* comes from the sonant nasal) अदभ्यस्तात् P. vii. 1.4; द्विरुक्तादत् CāndraVyā. i. 4.4; **ii** the syllable *at* which is lost before *iti* in some imitative words like *paṭiti*, *jhaṭiti* (coming from पटदिति, झटदिति ); अव्यक्तानुकरणस्यात इतौ P. vi. 1.98; CāndraVyā. v. 1.102; ŚākaṭāVyā. i. 1.127.

[3]**अत्** ( at ) (Gr.) *a* as the substitute for the base of the pronoun *idam* अद् व्यञ्जनेऽनक् Kātan. ii. 3.35 ( comm. इदमोऽम्वर्जितोऽद् भवति व्यञ्जनादौ विभक्तौ )

[4]**अत्** ( at ) (Gr.) a *taddhita* suffix in the function of a case found in the adverb *kva* किमोऽत् P. v. 3.12; अत् क्व च Kātan. ii. 6.32.

[5]**अत्** ( at ) (Gr.) the ending *a* of the 1st sg. medial of Potential इटोऽत् P. iii. 4.106.

[6]**अत्** ( at ) *ind.* [v. l. for श्रत् in *ūryādigaṇa on* P. i. 4.61; GaṇPā. 31.36; said to express surprise and explained as abbreviation of *ati* probably found in *adbhuta*]

[7]**अत्** ( at ) (Gr.) a case suffix found in personal pronouns in Abl. sg. and plural in the forms *asmat*, *yuṣmat* पञ्चम्या अत् P. vii. 1.31; Kātan. ii. 3.14; JaineVyā. v. 1.27; CāndraVyā. ii. 1.30.

[8]**अत्** ( at ) (Gr.) the *samāsānta* suffix *a* ( = अ P. v. 4.74 ) ऋक्पूःपथ्यपोऽत् ŚākaṭāVyā. ii. 1.139; SiddhaHe. vii. 3.76.

[9]**अत्** ( a-t ) (Gr.) *adj.* not having the sound *t* एङ्ह्रस्वात्संबुद्धावतः CāndraVyā. v. 1.68 ( comm. अतकारस्य लोपः )

[1]**अत** ( at-a ) *adj.* **i** zealous, making continuous efforts रसा … । अत तवातासा रक्षतस्त्वस्तु Kāvyālaṅ.(Ru.) 5.20 ( comm. हे अत । अतति नित्यमेवोद्यमं भजत इत्यर्थः ); **ii** moving (continuously), spreading (all around)